✧˖°*❋ ❋*°˖✧

# শ্রী পংচাযুধ স্তোত্রম্

## Sri Panchayudha Stotram of Shriman Narayan

in bengali

✧˖°*❋ ❋*°˖✧

# ॥ শ্রী পংচাযুধ স্তোত্রম্ ॥

স্ফুরত্সহস্রারশিখাতিতীব্রং
সুদর্শনং ভাস্করকোটিতুল্যম্ ।
সুরদ্বিষাং প্রাণবিনাশি বিষ্ণোঃ
চক্রং সদাঽহং শরণং প্রপদ্যে ॥ 1 ॥

বিষ্ণোর্মুখোত্থানিলপূরিতস্য
যস্য ধ্বনির্দানবদর্পহংতা ।
তং পাংচজন্যং শশিকোটিশুভ্রং
শংখং সদাঽহং শরণং প্রপদ্যে ॥ 2 ॥

হিরণ্মযীং মেরুসমানসারাং
কৌমোদকীং দৈত্যকুলৈকহংত্রীম্ ।
বৈকুংঠবামাগ্রকরাগ্রমৃষ্টাং
গদাং সদাঽহং শরণং প্রপদ্যে ॥ 3 ॥

যজ্জ্যানিনাদশ্রবণাত্সুরাণাং
চেতাংসি নির্মুক্তভযানি সদ্যঃ ।
ভবংতি দৈত্যাশনিবাণবর্ষৈঃ
শারংগং সদাঽহং শরণং প্রপদ্যে ॥ 4 ॥

রক্ষোঽসুরাণাং কঠিনোগ্রকংঠ-
-চ্ছেদক্ষরৎক্ষোণিত দিগ্ধসারম্ ।
তং নংদকং নাম হরেঃ প্রদীপ্তং
খড্গং সদাঽহং শরণং প্রপদ্যে ॥ 5 ॥

ইমং হরেঃ পংচমহাযুধানাং
স্তবং পঠেদ্যোঽনুদিনং প্রভাতে ।
সমস্ত দুঃখানি ভযানি সদ্যঃ
পাপানি নশ্যংতি সুখানি সংতি ॥ 6 ॥

বনে রণে শত্রু জলাগ্নিমধ্যে
যদৃচ্ছযাপত্সু মহাভযেষু ।
পঠেত্বিদং স্তোত্রমনাকুলাত্মা
সুখীভবেত্তত্কৃত সর্বরক্ষঃ ॥ 7 ॥

যচ্চক্রশংখং গদখড্গশারংগিণং
পীতাংবরং কৌস্তুভবত্সলাংছিতম্ ।
শ্রিযাসমেতোজ্জ্বলশোভিতাংগং
বিষ্ণুং সদাঽহং শরণং প্রপদ্যে ॥

জলে রক্ষতু বারাহঃ স্থলে রক্ষতু বামনঃ ।
অটব্যাং নারসিংহশ্চ সর্বতঃ পাতু কেশবঃ ॥

**ইতি পংচাযুধ স্তোত্রম্ ॥**

✧˖°*❋ ❋*°˖✧

Free download PDF of all types of mantra, stotram,vandana,arati: chalisapdf.net